**तृतीयः पाठः**

# महर्षिः दयानन्दः

**भारतीया संस्कृतिः संसारस्य पुरातनसंस्कृतिषु प्रधानतमा वर्तते। समये-समये अनेके महापुरुषाः भारते अवतीर्य एताम् अस्मद्देशीयां संस्कृतिं श्रेष्ठतायाः चरमसीमां नीतवन्तः। महर्षिः दयानन्दः तेषु प्रधानतमः उन्नायकः आसीत्। अस्मिन् पाठे महर्षेः दयानन्दस्य जीवनचरितं प्रस्तूयते।**

महर्षेः दयानन्दस्य जन्म गुर्जरप्रदेशे ब्राह्मणपरिवारे फरवरीमासे द्वादशे दिनाङ्के चतुर्विंशत्युत्तराऽष्टादशशततमे (12/02/1824) ईशवीये वर्षे अभवत्। अस्य जन्मनाम मूलशङ्करः आसीत्। यदा एषः षोडशवर्षीयः जातः तदा अस्य भगिनी स्वर्गं गता। वर्षत्रयानन्तरं चास्य पितृव्योऽपि दिवं गतः। गृहे अन्येषु जनेषु विलपत्सु अयं संसारस्य अनित्यतां विचारयन् ''कथमहम् अमरो भवेयम्'' इति चिन्तयामास। एकस्मिन्दिने मूलशङ्करः सहसैव स्वगृहमत्यजत्।



ततोऽसौ देशाद्देशान्तरं विचरन् व्याकरणवेदान्तादीन्यनेकशास्त्राणि विशेषतः योगपद्धतिं च अशिक्षत। विचरणकालेऽयं नर्मदातीरे स्वामिपूर्णानन्दसरस्वतिसकाशात् संन्यासमगृह्णात्। तदा एषः 'दयानन्दसरस्वतीति' नाम्ना प्रसिद्धः जातः। अनन्तरं मथुरां गत्वा प्रज्ञाचक्षुषः स्वामिनः विरजानन्दात् बहुविधानि शास्त्राणि अशिक्षत। विद्यासमाप्तौ गुरुस्तमादिशत्-वत्स ! देशोऽयमस्माकमविद्यान्धकारे पतितो वर्तते तद् गच्छ अविद्यान्धकारम् अपनय। आर्षशास्त्राणि उद्धर वैदिकज्योतिः च पुनः प्रकाशय। दयानन्दोऽपि गुरोराज्ञां शिरसि कृत्वा पादौ प्रणम्य आशिषं च गृहीत्वा एतद्देशवासिनः मानवान् अविद्यान्धकाराद् उद्धर्तुं कार्यक्षेत्रं समागतः। गुरोराज्ञां पालयन् देशसमाजयोः उन्नत्यै निरन्तरं भारतीयसंस्कृतेः प्रचारमकरोत्। पाखण्डोन्मूलनाय वैदिकधर्मस्य च पुनःसंस्थापनाय अयं सम्पूर्णदेशे बभ्राम। सामाजिककुप्रथानां निवारणाय एषः आर्यसमाजस्य स्थापनां कृतवान्। महर्षिः विधवाऽबलानां दलितवर्गाणां गवां च उद्धाराय सदैव प्रायतत। स्वातन्त्र्यभावनाऽपि प्रथममनेनैव महर्षिणास्माकं हृदयेषु जागरिता। नानाविधानि दुःखानि सोढ्वापि नायं कर्त्तव्यविमुखो जातः। येनास्य महापुरुषस्य ख्यातिः सर्वत्र व्याप्ता।

अयं महापुरुषः चिरोपेक्षितवेदानां प्रचारमकरोत्। एतस्य विशिष्टः सन्देशः आसीत् यत्-जनाः वेदान् प्रत्यागच्छेयुः। ऋग्वेदादिभाष्यभूमिका-सत्यार्थप्रकाश-संस्कारविधिप्रभृतिग्रन्थाः एतेन विरचिताः। अक्टूबरमासे त्रिंशत् दिनाङ्के त्र्यशीत्युत्तराऽष्टादशशततमे (30/10/1883) ईशवीये वर्षे एषः भौतिकं शरीरं विहाय यशःशरीरेणामरोऽभवत्।

महर्षिः दयानन्दः सत्यस्य धैर्यस्य ब्रह्मचर्यस्य च मूर्तिरासीत्। एतस्य चरितं सदैव भारतीयानां कृते अनुकरणीयमस्ति। एतादृशाः महात्मानः सर्वदा वन्द्या अविस्मरणीयाश्च भवन्ति।

## शब्दार्थ:

षोडशवर्षीय: - सोलह वर्ष का। पितृव्य: - चाचा। एकस्मिन्दिने - एक दिन। योगपद्धतिम् - योग की प्रक्रिया को। प्रज्ञाचक्षुष: - ज्ञाननेत्र वाले/सूर से (पञ्चमी)। अविद्यान्धकारे - अज्ञानता रूपी अन्धकार में। आर्षशास्त्राणि - ऋषियों द्वारा रचित शास्त्रों को। पाखण्डोन्मूलनाय - आडम्बर/दिखावा/झूँठ को दूर करने के लिए। सोढ्वाऽपि - सहकर भी। चिरोपेक्षितवेदानाम् - बहुत समय से उपेक्षित वेदों का।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) दयानन्दस्य जन्म कस्मिन् प्रदेशे अभवत् ?

(ख) दयानन्द: कस्मात् बहुविधानि शास्त्राणि अशिक्षत ?

(ग) महर्षि: कस्य स्थापनां कृतवान् ?

(घ) दयानन्द: कयो: उन्नत्यै भारतीयसंस्कृते: प्रचारमकरोत् ?

(ङ) दयानन्दस्य चरितं केषां कृते अनुकरणीयमस्ति ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) दयानन्दस्य जन्मनाम किम् आसीत् ?

(ख) संन्यासग्रहणानन्तरं महर्षि: केन नाम्ना प्रसिद्ध: ?

(ग) महर्षि: केषाम् उद्धाराय सदैव प्रायतत् ?

(घ) दयानन्द: केषां प्रचारमकरोत् ?

(ङ) दयानन्द: कस्य मूर्तिरासीत् ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) दयानन्द: किमर्थं स्वगृहमत्यजत् ?

(ख) विद्यासमाप्तौ गुरु: दयानन्दं किम् आदिष्टवान् ?

(ग) दयानन्देन के ग्रन्था: विरचिता: ?

4. **प्रदत्तशब्दै: रिक्तस्थानानि पूरयत -**

(अविद्यान्धकारात्, संन्यासमगृह्णात् , यश:, दु:खानि, वेदान्)

(क) महर्षि: पूर्णानन्दसरस्वतीसकाशात् ......................।

(ख) दयानन्द: मानवान् ........................ उद्धर्तुं कार्यक्षेत्रे समागत:।

(ग) जना: .......................... प्रत्यागच्छेयु: इति महर्षे: सन्देश:।

(घ) दयानन्द: ................... सोढ्वापि कर्त्तव्यविमुख: न जात:।

(ङ) महर्षि: .................... शरीरेण अमर: अस्ति।

5. **यथायोग्यं योजयत -**

| 'अ' | 'आ' |
|---|---|
| (क) दयानन्दस्य जन्म | सम्पूर्णदेशे बभ्राम |
| (ख) महर्षिणा प्रकाशिता | योगपद्धतिम् |
| (ग) प्रथमं स्वातन्त्र्यभावना | १८२४ ईशवीये वर्षे |
| (घ) महर्षि: पाखण्डोन्मूलनाय | वैदिकज्योति: |
| (ङ) दयानन्द: विशेषत: अशिक्षत | दयानन्देन जागरिता |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) कथमहम् अमरो भवेयम् इति महर्षि: चिन्तयामास। ☐

(ख) त्र्यशीत्युत्तराऽष्टादशशततमे ईशवीये वर्षे महर्षि: न दिवंगत:। ☐

(ग) महर्षे: ख्याति: सर्वत्र व्याप्ता अस्ति। ☐

(घ) दयानन्द: सामाजिककुप्रथानां निवारणं कृतवान्। ☐

(ङ) महर्षिसदृशा: महात्मान: वन्द्या: न भवन्ति। ☐

7. **उदाहरणानुसारं शब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा - जना: | जन | प्रथमा | बहुवचनम् |
| (क) महर्षे: | | | |
| (ख) नर्मदातीरे | | | |
| (ग) गवाम् | | | |
| (घ) सर्वेषाम् | | | |
| (ङ) सत्यस्य | | | |
| (च) महात्मान: | | | |
| (छ) जनेषु | | | |

8. **उदाहरणानुसारं क्रियापदानां धातुं लकारं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | वचनम् |
|---|---|---|---|
| यथा - भवन्ति | भू (भव्) | लट् | बहुवचनम् |
| (क) अभवत् | | | |
| (ख) अकरोत् | | | |
| (ग) अशिक्षत | | | |
| (घ) गच्छ | | | |
| (ङ) आसीत् | | | |
| (च) आगच्छेयु: | | | |

9. **उदाहरणानुसारं धातुं प्रत्ययं च पृथक् कुरुत –**

| पदम् | धातुः | प्रत्ययः |
|---|---|---|
| यथा –गत्वा | गम् | क्त्वा |
| (क) कृतवान् | | |
| (ख) गतः | | |
| (ग) प्रणम्य | | |
| (घ) उद्धर्तुम् | | |
| (ङ) विचरन् | | |

10. **उदाहरणानुसारं सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| शब्दः | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| यथा – चिरोपेक्षितः | चिर + उपेक्षितः | गुणस्वरसन्धिः |
| (क) पितृव्योऽपि | | |
| (ख) सदैव | | |
| (ग) प्रत्यागच्छेयुः | | |
| (घ) मूर्तिरासीत् | | |
| (ङ) महर्षिणास्माकम् | | |

## योग्यताविस्तारः –

- स्वामिदयानन्दसदृशानां महापुरुषाणां नामानि अन्विष्य लिखत।
- महर्षेः दयानन्दस्य आदर्शविषये पञ्चवाक्यानि लिखत।